# Shivastutishlokasamnayanam 6

# શિવસ્તુતિશ્લોકસંનયનમ્ ૬

## Document Information

Text title : Shivastutishlokasamnayanam 6

File name : shivastutishlokasaMnayanam6.itx

Category : shiva, shivarahasya, stuti

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mahAdevAkhyaH ekAdashamAMshaH | shivastutishlokasaMnayana

5 | vAvRittashlokAH ||

Latest update : October 29, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskrit**.

November 3, 2024

*sanskritdocuments.org*

# Shivastutishlokasamnayanam 6

# શિવસ્તુતિશ્લોકસંનયનમ્ ૬

(શિવરહસ્યાન્તર્ગતે મહાદેવાખ્યે)

નમસ્તે દેવદેવાય શિવાયાકાશમૂર્તયે ।
ભવાય ભવ્યરૂપાય હરભૂમ્યાત્મને નમઃ ॥ ૫.૭૪॥

વ્યક્તાવ્યક્તાય સોમાય જલરૂપાય તે નમઃ ।
ઉગ્રાય ભીમરૂપાય વાયુમૂર્ત્યાત્મને નમઃ ॥ ૫.૭૫॥

વ્યોમકેશાય નિત્યાય તેજોમૂર્ત્યાત્મને નમઃ । ૫.૭૬.૧

ભસ્માઙ્ગાય ભવાય ભાવુક હૃદોત્તુઙ્ગાય ગઙ્ગારય-
સ્ફારાઘોરમહોત્તમાઙ્ગ વિલસલ્લિઙ્ગાય શાઙ્ગાય તે ।
કામાદ્યઙ્ગવિભઙ્ગકાય સુમહાદિત્યાઙ્ગસઙ્ગસ્ફુર-
જાલાઙ્ગાય કુરઙ્ગબાલવિલસદ્ધસ્તાય તુભ્યં નમઃ ॥ ૧૪.૫૧॥

ઈશાય શાશ્વત જગત્સ્થિતિનાશકેશ
વ્યોમાવકાશ શશિધામ વિભાસિ ધામ્ને ।
ભૂમ્ને વિધૂતતમસે રભસે વિશોક-
સીમ્ને ભવાય વિભવાય નમોનમસ્તે ॥ ૧૪.૫૨॥

ધ્યાયેદીશાનમવ્યગ્ર ઉગ્રં દેવં પિનાકિનમ્ ॥ ૧૫.૨૨.૨॥

ત્રિલોચનં નીલકણ્ઠં વરદાભયપાણિનમ્ ।
ઉમાસહાયં વિશ્વેશં વિશ્વાધારં સનાતનમ્ ॥ ૧૫.૨૩॥

સર્વાભરણશોભાઢ્યં ગન્ધવાસાદ્યલઙ્કૃતમ્ ।
ત્રિપુણ્ડ્રચન્દ્રાર્ધધરં ભૂતિભૂષિતવિગ્રહમ્ ॥ ૧૫.૨૪॥

મન્દસ્મિતમુખામ્ભોજં સુન્દરાનનપઙ્કજમ્ ।
ધ્યાયેદ્દેવં વિરૂપાક્ષં નિર્જિત્યાક્ષાણિ સુવ્રતઃ ॥ ૧૫.૨૫॥

ધ્યાત્વૈવં દેવમીશાનં નીલકણ્ઠં ત્રિયમ્બકમ્ ॥ ૨૧.૨૧॥

સોમાસ્કન્દં ચન્દ્રચૂડં દિવ્યસ્રગ્ગન્ધ ભૂષિતમ્ ।
વ્યાઘ્રચર્મપરીધાનં નાગાભરણભૂષિતમ્ ॥ ૨૧.૨૨॥

ભસ્માઙ્ગરાગસુભગં મન્દસ્મેરમુખામ્બુજમ્ । ૨૧.૨૨.૧

ધ્યાયેદેવં વિરૂપાક્ષં નીલકણ્ઠમુમાયુતમ્ ।
મૃગાઙ્કશેખરં શાન્તં સર્વાભરણભૂષિતમ્ ॥ ૨૨.૧૭॥

ચન્દ્રગઙ્ગાધરં સૌમ્યં સોમં કુન્દદ્યુતિં શિવમ્ ।
ત્રિલોચનં નીલકણ્ઠં વરદાભયપાણિનમ્ ॥ ૨૩.૨૧॥

ત્રિપુણ્ડ્રવિલસદ્ભાલં વાસોઽલઙ્કારભૂષિતમ્ ।
બ્રહ્મવિષ્ણ્વાદિવન્દ્યાઙ્ઘ્રિં તરુણં પ્રિયદર્શનમ્ ॥ ૨૩.૨૨॥

ધ્યાત્વા હૃત્પદ્મનિલયે દેવદેવં પિનાકિનમ્ । ૨૩.૨૩.૧

ધ્યાયેદ્હૃદા મહાદેવં સામ્બં ચન્દ્રકલાધરમ્ ॥ ૨૫.૧૧.૨॥

ત્રિણેત્રં નીલકણ્ઠં ચ વરદાભયપાણિનમ્ ।
શાશ્વતં શઙ્કરં શિવં હૃત્પદ્મસદનસ્થિતમ્ ॥ ૨૫.૧૨॥

ધ્યાયેદ્દેવં નિત્યં મહેશં રજતગિરિવિસં ચારુચન્દ્રાવતંસં
રત્નાઽઽકલ્પોજ્જવલાઙ્ગં પરશુમૃગવરાભીતિહસ્તાન્તરઙ્ગમ્ ।
પદ્માસીનં સહામ્બં વૃતગણપગણૈર્વ્યાઘ્રકૃત્તિં વસાનં
વિશ્વાદ્યં વિશ્વવન્દ્યં નિખિલભયહરં સર્વપાપાપહારમ્ ॥ ૩૨.૩૫॥

ગઙ્ગાધરાન્ધકરિપો પ્રમથાધિનાથ
વિશ્વેશ વિશ્વગતસર્જકભર્જકાન્તે ।
બ્રહ્માદિવિષ્ણુસુરવર્ગસુપૂજિતાઙ્ઘ્રે
મામીશ પાહિ દયયા સ્મરકાલનાશ ॥ ૩૪.૪૮॥

શિવાય દેવદેવાય મહાદેવાય યોગિને ।
રુદ્રાય સ્થાણવે નિત્યં હરાયોગ્રાય તે નમઃ ॥ ૪૫.૪૧॥

પરમેશાય સિદ્ધાય સર્વસિદ્ધિપ્રદાયિને ।
ત્ર્યમ્બકાય મહેશાય અતિશાન્તાય તે નમઃ ॥ ૪૫.૪૨॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવસ્તુતિશ્લોકસંનયનમ્ ૬ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । મહાદેવાખ્યઃ એકાદશમાંશઃ । શિવસ્તુતિશ્લોકસંનયનમ્ ૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . mahAdevAkhyaH ekAdashamAMshaH . shivastutishlokasaMnayanam 5 . vAvRRittashlokAH ..

Notes:

The shlokas eulogizing Shiva શિવ; that eventuate sporadically in various Adhyaya-s of Shiva Rahasyam Amsa-11, are collated on this page.

Proofread by Ruma Dewan

---

*Shivastutishlokasamnayanam 6*

pdf was typeset on November 3, 2024

Please send corrections to *sanskrit@cheerful.com*